ജില്ലാ വിദ്യാഭ്യാസ പരിശീലന കേന്ദ്രം
District Institute of Education & Training (DIET)
Kozhikode



# റെസൊണൻസ്

2022

## പത്താംക്ലാസ് വിദ്യാർത്ഥികൾക്കുള്ള പഠന സഹായി

## സംസ്കൃതം

കരിക്കുലം മെറ്റീരിയൽ ഡെവലപ്മെന്റ് & ഇവാല്വേഷൻ
(സി.എം.ഡി.ഇ. വിഭാഗം)

2022 ജനുവരി

ജില്ലാ വിദ്യാഭ്യാസ പരിശീലന കേന്ദ്രം,
കോഴിക്കോട് (ഡയറ്റ്)
District Institute of Education and Training (DIET), Kozhikode.

# റെസൊണൻസ്
2022

എസ്.എസ്.എൽ.സി വിദ്യാർത്ഥികൾക്കുള്ള
പഠനസഹായി
**Support Material for SSLC Students**

# സംസ്കൃതം


പ്രസിദ്ധീകരിച്ചത് : 2022 ജനുവരി

വി.വി പ്രേമരാജൻ
പ്രിൻസിപ്പാൾ, ഡയറ്റ് കോഴിക്കോട്

**നിർമ്മാണ ചുമതല:**
സി.എം.ഡി.ഇ. വിഭാഗം ഡയറ്റ്
**അബ്ദുന്നാസർ. യു.കെ.** സീനിയർ ലക്ചറർ
**പ്രബീഷ്. എം.** ലക്ചറർ, ഡയറ്റ്

**എഡിറ്റിംഗ് ചുമതല:**
**ഡോ. സി. ഭാമിനി,** സീനിയർ ലക്ചറർ
**ഡോ. കെ.എസ്. വാസുദേവൻ,** സീനിയർ ലക്ചറർ
**ഡോ.ബാബു വർഗ്ഗീസ്,** സീനിയർ ലക്ചറർ
**ഡോ. അശോകൻ നൊച്ചാട്,** സീനിയർ ലക്ചറർ
**സാജു തോമസ്,** സീനിയർ ലക്ചറർ

വിഷയ ചുമതല:
ഡോ. ടി.കെ. കൃഷ്ണകുമാർ
ലക്ചറർ, സംസ്കൃതം

ശില്പശാലയിൽ പങ്കെടുത്തവർ:

രതീഷ് എ.കെ.
ബി.ഇ.എം. എച്ച്.എസ്.എസ്. വടകര

റജിലേഷ് പി.എം
തിരുവങ്ങൂർ എച്ച്.എസ്.എസ്. കൊയിലാണ്ടി

ശിവേഷ് പി.പി.
എംജെ വി.എച്ച്.എസ്.എസ്. വില്ല്യാപ്പള്ളി

അനുപമ കെ.
കെ.കെ.എം.ജി.വി.എച്ച്.എസ്.എസ്. ഓർക്കാട്ടേരി

ലേ ഔട്ട്, കവർ ഡിസൈനിംഗ് :
**മുഹമ്മദ് ബഷീർ കെ.എം.**
സേതു സീതാറാം എ.എൽ.പി.സ്കൂൾ, എലത്തൂർ.

കോപ്പികളുടെ എണ്ണം: 1000



**വി.വി പ്രേമരാജൻ**
പ്രിൻസിപ്പാൾ
ഡയറ്റ് കോഴിക്കോട്

പ്രിയപ്പെട്ട കൂട്ടുകാരേ,

കോവിഡിന്റെ തുടർച്ച സ്വഭാവിക ക്ലാസ്സ്റൂം പഠനവും അനുഭവങ്ങളും ലഭിക്കുന്നതിന് ഈ വർഷവും വിലങ്ങുതടിയായിട്ടുണ്ട്. നവംബർ മാസം വരെ ഓൺലൈൻ ആയും തുടർന്ന് ഓരോ ആഴ്ചയിലും മൂന്ന് ദിവസങ്ങളിൽ പകുതി മാത്രം അധ്യയന സമയവുമാണ് നമ്മുടെ വിദ്യാർത്ഥികൾക്ക് ലഭ്യമായത്. മുൻവർഷത്തെ പോലെ തന്നെ ഊന്നൽ മേഖലകൾ നൽകിയതിനൊപ്പം കുട്ടികളുടെ ഉപരിപഠനത്തിനുള്ള പ്രാധാന്യം കൂടി നൽകി കൊണ്ടാണ് ഈ വർഷം പാഠഭാഗങ്ങൾ നിർദേശിച്ചിരിക്കുന്നത്. ഓരോ വിഷയത്തിലെയും അടിസ്ഥാനശേഷികൾ ഉറപ്പാക്കും വിധത്തിൽ ക്ലാസ്സ് റൂം ചർച്ചകൾക്കും സ്വയം പഠനത്തിനും കൂടുതൽ ശ്രദ്ധ നൽകേണ്ട പാഠഭാഗങ്ങളാണ് ഊന്നൽ മേഖലയിൽ ഉൾപ്പെടുത്തിയിരിക്കുന്നത്. ഊന്നൽ മേഖലകളും അല്ലാത്തതുമായ പാഠഭാഗങ്ങൾ എളുപ്പത്തിൽ സ്വാംശീകരിക്കുന്നതിനും എസ്.സി.ഇ.ആർ.ടി. നിർദേശിച്ച ചോദ്യമാതൃകകൾ എളുപ്പത്തിൽ ബോധ്യപ്പെടുന്നതിനും സഹായകരമായ രീതിയിലാണ് ജില്ലാ വിദ്യാഭ്യാസ പരിശീലന കേന്ദ്രം (ഡയറ്റ് ) 'റസണൻസ് - 2022' എന്ന പേരിലുള്ള ഈ പഠന സഹായി തയ്യാറാക്കിയിരിക്കുന്നത്.

ക്ലാസ്സ്റൂം പ്രവർത്തനങ്ങൾക്കും ഓൺലൈൻ ക്ലാസ്സുകൾക്കും അനുപൂരകമാക്കുന്ന രീതിയിൽ ഇതിലെ പ്രവർത്തനങ്ങൾ പ്രയോജനപ്പെടുത്താൻ കുട്ടികളെ സഹായിക്കുന്നതിന് ആവശ്യമായ ഇടപെടലുകൾ അധ്യാപകരുടെ ഭാഗത്തു നിന്നുണ്ടാവണമെന്നഭ്യർത്ഥിക്കുന്നു.

കോവിസ് കാലത്തെ പ്രത്യേക സാഹചര്യങ്ങൾ പരിഗണിച്ച് ഒട്ടും ആശങ്കയില്ലാതെ ആത്മവിശ്വാസത്തോടെ പരീക്ഷയെഴുതാൻ നമ്മുടെ കുട്ടികളെ സജ്ജരാക്കാൻ ഈ പഠന പിന്തുണാ സഹായി ഒരു മുതൽകൂട്ടാവട്ടെ.

എല്ലാവർക്കും വിജയാശംസകൾ നേരുന്നു.

കോഴിക്കോട്
30 - 01 - 2022



**ശ്രീമതി. വി.പി മിനി.**
വിദ്യാഭ്യാസ ഉപഡയരക്ടർ &
കൺവീനർ, എഡ്യുകെയർ പദ്ധതി

പ്രിയപ്പെട്ട കുട്ടികളെ,

കോവിഡിനൊപ്പം നാം ഈ വർഷവും പൊതു പരീക്ഷയെ അഭിമുഖീകരിക്കയാണ്. നേരിട്ടും ഓൺ ലൈൻവഴിയുമെല്ലാം പരമാവധി പഠന സാഹചര്യങ്ങളൊരുക്കാൻ നമുക്ക് കഴിഞ്ഞിട്ടുണ്ട്. കോവിഡ് സാഹചര്യത്തിൽ മുൻ വർഷങ്ങളിലെ പോലെ പൂർണ്ണാർത്ഥത്തിൽ പഠനാനുഭവങ്ങളൊരുക്കാൻ കഴിഞ്ഞിട്ടില്ലെന്ന ബോധ്യമുണ്ട്. എങ്കിലും പാഠഭാഗങ്ങളുടെ വിനിമയവും പരീക്ഷ ഒരുക്കങ്ങളും പരമാവധി പൂർത്തിയായിട്ടുണ്ട്. ഇനി കുട്ടികൾക്ക് സംശയങ്ങൾ ദൂരീകരിക്കുന്നതിനും പരീക്ഷയ്ക്ക് തയ്യാറെടുക്കുന്നതിനുമുള്ള സമയമാണ്. എസ്.എസ്.എൽ.സി. പരീക്ഷാഫലം എല്ലാവരും ഉറ്റുനോക്കുന്നുവെന്നതിനാൽ തന്നെ അല്പം ആശങ്കകളും പിരിമുറുക്കവുമൊക്കെ ചിലർക്കെങ്കിലുമുണ്ട്. ഇവയെല്ലാം മറികടന്ന് ആത്മവിശ്വാസത്തോടെയും ഉത്സാഹത്തോടെയും പരീക്ഷയെഴുതാൻ കുട്ടികൾ പ്രാപ്തരാവണം.

പരീക്ഷയ്ക്ക് പാഠ ഭാഗങ്ങൾ ഒന്നും ഒഴിവാക്കിയിട്ടില്ലെങ്കിലും കൂടുതൽ ശ്രദ്ധിക്കേണ്ട പാഠഭാഗങ്ങൾ എസ്.സി.ഇ.ആർ.ടി നിർദ്ദേശിച്ചിട്ടുണ്ട്. ഓരോ വിഷയത്തിലും മികച്ച വിജയം നേടാൻ കഴിയുംവിധം സവിശേഷ പ്രവർത്തനങ്ങളും ചോദ്യമാതൃകകളുമെല്ലാം ഉൾപ്പെടുത്തിയാണ് ഡയറ്റിന്റെ അക്കാദമിക നേതൃത്വത്തിൽ 'റസണൻസ് - 2022' തയ്യാറാക്കിയിരിക്കുന്നത്. അധ്യാപകരുടെ പിന്തുണയോടെ സംശയനിവാരണം നടത്താനും സ്വയം പഠനത്തിനുമെല്ലാം ഇത് ഫലപ്രദമായി ഉപയോഗിക്കുമല്ലോ. കോവിഡ് സൃഷ്ടിച്ച പരിമിതികൾ മറികടന്ന് അഭിമാനകരമായ വിജയം കരസ്ഥമാക്കാൻ നിങ്ങൾക്കോരോരുത്തർക്കും കഴിയട്ടെ.

വിജയാശംസകൾ നേരുന്നു.

കോഴിക്കോട്
30 - 01 - 2022

FOCUS AREA

# SANSKRIT

Academic and Oriental Schools

| एककम् | पाठस्य नाम | |
|---|---|---|
| १ जीवनम् | १ आयुरारोग्यसौख्यम्। | (सुभाषितानि) |
| | २ दीनवत्सला जननी। | (कथा) |
| | ३ मधुमान् नो वनस्पतिः। | (विवरणम्) |
| २ पैतृकम् | ४ कनकधारा। | (काव्यम्) |
| | ५ जयन्ति ते सुकृतिनः। | (जीवचरितम्) |
| | ६ रागसुधारस। | (विवरणम्) |

## QUESTION PATTERN

| QUESTIONS | % | SCORE | TOTAL SCORE |
|---|---|---|---|
| Questions from Focus Area | 70% | 28 | 40 |
| Questions from Out of Focus Area | 30% | 12 | |

## DETAILS OF SCORE AND NO. OF QUESTIONS

| Score | No. of Qns from | | Total No.of qns | No. of Qns to be answered from | | Total Score |
|---|---|---|---|---|---|---|
| | Focus Area | Out of Focus Area | | Focus Area | Out of Focus Area | |
| 01 | 06 | 03 | 09 | 04 | 03 | 07 |
| 02 | 01 | 02 | 03 | 01 | 01 | 04 |
| 03 | 04 | 01 | 05 | 03 | 01 | 12 |
| 04 | 03 | 02 | 05 | 02 | 01 | 12 |
| 05 | 02 | - | 02 | 01 | - | 05 |
| | 16 | 08 | 24 | 11 | 06 | 40 |

एककम् - १

जीवनम्

पाठः- १

## आयुरारोग्यसौख्यम्

आरोग्यसम्बन्धीनि सुभाषितान्येवास्मिन् पाठे अन्तर्भवन्ति। सुष्ठु भाषितं सुभाषितम्। अनुभवसहस्त्रेभ्यः आर्जितं विज्ञानमेव सुभाषितैरुद्घुष्यते। धार्मिकमूल्यानि स्वायत्तीकर्तुं स्वजीवने प्रयोक्तुं च सुभाषितानि प्रयोजनप्रदानि। शारीरिकमानसिक विकासाय आरोग्य संरक्षणाय च तानि प्रयोजनप्रदानि भवन्ति।

### श्रद्धेयाः अंशाः

- ► स्वास्थ्यमेव परं धनम् ।
- ► व्यायामः अवधानतया करणीयः।
- ► भोजनावसरे ईर्ष्यादिविकाराः न भवेत् ।
- ► आरोग्यसंरक्षणे व्यायामः आहारमितत्वं च अनुशीलनीयम्।
- ► सुखदुखयोः हेतुः स्वस्यकर्मः एव भवति ।

**<u>कोष्ठकात् समुचितमुत्तरं चित्वा लिखत ।</u>**

१. भूगतौ अश्विनीसुतौ . . . . . . . . . ?

( धनं श्रुतं च , आरोग्यं धनं च , **परिश्रमः मिताहारः च** )

२. धनानाम् उत्तमं . . . . . . . . ?

( **दाक्ष्यं** , श्रुतं , तुष्टिः )

३. व्यायामः कथं करणीयः ?

( क्रोधेन , **शनैः** , वेगेन )

४. सुखदुखयोः कर्ता कः ?

( **आत्मा** , शरीरं , बुद्धिः )

५. ' एति ' इति पदस्य लकारः कः ?

( लङ् , **लट्** , लोट् )

६. लाभानां श्रेष्ठं किम् ?

( श्रुतं , तुष्टिः, **आरोग्यं** )

---

**यथोचितं योजयत ।**

परिश्रमः - तुष्टिः

देववैद्यौ - चरकसंहिता

धनम् - अश्विनीसुतौ

चरकः - अर्थः

सुखम् - व्यायामः

**उदाहरणानुसारं एकपदं लिखत ।**

**उदा -** हितश्च असौ आहारः च - हिताहारः ।

१. मितश्च असौ आहारः च - .............................................

**उदा** - गुणः अस्य अस्ति इति - गुणी ।

२. देहः अस्य अस्ति इति - .............................................

**उदाहरणानुसारं पदच्छेदं लिखतः ।**

उदा - धर्मश्च = धर्मः + च ।

१. व्यायामश्च = ............................+............................. ।

उदा - तेनैव = तेन + एव ।

२. अनेनैव = ............................+.................................. ।

**अधोदत्तं श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत ।**

' परिश्रमो मिताहारो भूगतावश्विनीसुतौ ।

तावनादृत्य नैवाहं वैद्यमन्यं समाश्रये ' ।।

**१.** भूगतौ अश्विनीसुतौ कौ ?

**२.** कं न समाश्रये ?

**३.** श्लोके प्रयुक्तं क्रियापदं किं ?

**४.** ' तावनादृत्य ' इत्यस्य पदच्छेदः कः ?

**५.** श्लोके प्रयुक्तं ल्यबन्तमव्ययं किम् ?

---

------------------------------------------------------------------------------------------------

**श्लोकं पठित्वा गद्यक्रमं लिखत**

**१.** धन्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम् ।
लाभानां श्रेष्ठमारोग्यं सुखानां तुष्टिरुत्तमा ।।

*धन्यानाम्.................. उत्तमम् ।............... श्रुतम् । लाभानां..................*
*श्रेष्ठम् ।.......................... उत्तमा भवति ।*

**२.** आत्मानमेव मन्येत कर्तारं सुखदुःखयोः ।
तस्मात् श्रेयस्करं मार्गं प्रतिपद्येत न त्रसेत् ।।

*सुखदुखयोः................ आत्मानमेव................. तस्मात् .......................*
*मार्गं .......................... प्रतिपद्येत । न .......................... ।*

**प्रदत्तं आशयप्रतिपादकं श्लोकं चित्वा लिखत ।**

**' सुखदुःखयोः हेतु स्वस्य कर्म भवति '**

**१.** ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानं
अन्नं न सम्यक् परिपाकमेति ।।

**२.** आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्मात् श्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत् ।।

**अधोदत्तं श्लोकं पठित्वा समुचितमाशयं चित्वा लिखत ।**

शनैरर्थः शनैः पन्थाः शनैः पर्वतमारुहेत् ।
शनैर्विद्या च धर्मश्च व्यायामश्च शनैः शनैः ।

**१.** आरोग्यसंरक्षणाय धर्मस्य योगदानः महद् अस्ति ।

**२.** आरोग्यसंरक्षणाय व्यायामः मन्दमेव अनुशीलनीयः ।

**३.** आरोग्यसंरक्षणाय व्यायामः आहारमितत्वं च अनुशीलनीयः ।

------------------------------------------------------------------------------------------------

---

**आस्वादनटीका लेखनम्**

आत्मानमेव मन्येत
कर्तारं सुखदुःखयोः ।
तस्मात् श्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत् ।।

**मातृका -**

चरकसंहितातः उद्धृतः अयं श्लोकः । स्वास्थ्यसंरक्षणे स्वस्य प्रवृत्तीनां प्राधान्यम् अनेन श्लोकेन प्रकाशितः ।

प्राचीनभारतीयाः आरोग्यसंरक्षणे कटीबद्धाः आसन् । तथा मानवकुलस्य सुखस्य दुःखस्य च हेतुः स्वस्य कर्म एव इति प्रभिज्ञानमपि तेषामासीत् । स्वजीवने किं कर्तव्यं किं च अकर्तव्यमिति धारणा आवश्यकी । सुखदुःखयोः मूलकारणम् अस्माकं कर्म एव । परोपकारादिभिः प्रवर्तनेभ्यः सुखं तद्विपरीतेन दुःखं च अनुभूयेत । पुण्य कर्मणा एव श्रेयस्करं मार्गं प्राप्यते । अतः विना भयं सत्कर्माणि करणीयानि ।

श्लोकोऽयम् अतीव हृद्य एव। लोको पकारकः महदाशयः काव्यात्मकतया प्रदिपादितोऽत्र ।

---

सुभाषितग्रन्थाः

| ग्रन्थस्यनाम | कर्ता/ सम्पादकः |
|---|---|
| नितिशतकम्<br>शृङ्गारशतकम्<br>वैराग्यशतकम् | भर्तृहरिः |
| सुभाषितरत्नभाण्डागारम् | नारायणराम आचार्य 'काव्यतीर्थ' |

---

पाठः २

## दीनवत्सला जननी

इतिहासद्वयेषु अन्यतमं भवति वेदव्यासविरचितं महाभारतम्। व्यास धृतराष्ट्रयोः संभाषण मध्ये व्यासेन कथिता कथा एव 'दीनवत्सला जननी' इति पाठ्यांशः। कथेयं महाभारतस्य वनपर्वणि अन्तर्भवति ।

**श्रद्धेयाः अंशाः**

| |
|---|
| ►दीनवत्सला जननी इति कथा महाभारतस्य वनपर्वात् उद्धृता भवति। |
| ►कथेयं दीनानुकम्पां प्रतिपादयति । |
| ►दीनेषु अवश्यं सविशेषश्रद्धा देया इति कथेयं उद्बोधयति । |

**वाक्येनैकेन उत्तरं लिखत ।**

1. दीनवत्सला जननी इति कथा किं प्रतिपादयति ? दीनानुकम्पाम्।
2. अस्याः कथायाः आशय: कस्मात् ग्रन्थात् स्वीकृतः ? महाभारतात् ।
3. महाभारतस्य कस्मिन् पर्वणि अस्या: कथाया: आशयः अस्ति ? वनपर्वणि।
4. सर्वधेनूनां माता का? सुरभिः।
5. कृषकः दुर्बलं वृषभं केन अताडयत् ? तोदनेन।
6. कृषकेन ताडितं वृषभं दृष्ट्वा का रुरोद ? सुरभिः।
7. खिन्ना सुरभिः केन समाश्वसिता ? वासवेन।
8. अपत्येषु तुल्यवत्सला का? जननी।
9. दुर्बल: वृषः ................. गन्तुमशक्ताचासीत् ? जवेन ।
10. अयि शुभे ! किमेवं रोदिषि ? कस्य वचनमिदम् ? वासवस्य।
11. गच्छ वत्से ! सर्वं भद्रं जायेत ।कस्येदं वचनम् ? इन्द्रस्य।
12. सर्वेष्वपत्येषु जननी तुल्यवत्सला | कस्याः वचनमिदम् ? सुरभे:।
13. दीनवत्सला जननी इति कथांशः व्यास: कं वदति ? धृतराष्ट्रम्।

**पदच्छेदः लिखत।**

1 कुर्वन्नासीत् - कुर्वन् + आसीत् । वदन्नासीत् - ................+.................. ।

2 नोत्थितः - न + उत्थितः । नोचितम् - .................+..................... ।

3 तथैव - तथा + एव। वृथैव - ................+.................... ।

---

-----------------------------------------------------------------------------------------------------------

**यथोचितं योजयत ।**

| | | | |
|---|---|---|---|
| १. सुराधिपः | - कृषकः | २. आखण्डल: | - लाङ्गलम् |
| वृषः | - माता | वृषभः | - तोत्रम् |
| बलीवर्दः | - जननी | हलम् | - इन्द्रः |
| कृषीवलः | - वासवः | तोदनम् | - ऋषभः |

**उदाहरणानुसारं विग्रहवाक्यं लिखत ।**

सुराधिपः - सुराणाम् अधिपः । नराधिपः ........................................... ।

कृपार्द्रहृदया - कृपया आर्द्रं हृदयं यस्याः सा । करुणार्द्रहृदयाा ........................................... ।

**अधोदत्तेभ्यः वाक्येभ्यः सम्बोधनपदं चित्वा लिखत ।**

१) भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि । ........................................... ।

२) गच्छ वसे ! सर्व भद्रं जायेत | ........................................... ।

**शतृशानजन्तौ विविच्य लिखत |**

1 आरोग्यसचिवः जनानां शुभम् आशंसमानः प्रभाषणं कुर्वन् अस्ति ।

२) पाचक: विभवं विचिन्तयन् आस्वाद्यमान: च पाकं करोति ।

**समानार्थकपदानि चित्वा लिखत ।**

1 आखण्डलः ........................................... ।

२) वृषः ........................................... ।

**यद्यपि - तथापि उपयुज्य परिवर्तयत ।**

उदा:- स दरिद्र: । दानशील: भवति ।

**यद्यपि** सः दरिद्रः **तथापि** दानशीलः भवति ।

१. वर्षकाल: समागतः । वृष्टिः नास्ति ।

२. सूर्य: उदयति | प्रकाश: न व्याप्नोति ।

३. पितामहः सम्पूर्णमौषधम् अपिबत् | रोगशमनं नाभवत् ।

-----------------------------------------------------------------------------------------------------------

----------------------------------------------------------------------------------------------

**अधोदत्तां घटनां पठित्वा सम्भाषणांशान् पूरयत ।**

एकदा केदारे क्षीणितं वृषभं कश्चन कर्षक: ताडयति ।तत् दृष्ट्वा सर्वधेनूनां माता सुरभिः रोदिति। वासवः कारणं पृच्छति। ''मम बहवः पुत्राः सन्ति। तथापि दुर्बले पुत्रे मातुः अधिकवात्सल्यं सहजमेव" इति सुरभिः प्रत्यवदत् ।

वासवः - हे सुरभे! किमर्थं रोदिषि ?

सुरभिः - हे. . . . . . . . . . . . ! मम पुत्रस्य दैन्यतां दृष्ट्वा रोदिमि।

वासवः - पुत्रस्य किमभवत् ?

सुरभिः - . . . . . . . . . . . . . तं ताडयति ।

वासवः - भवत्याः बहवः. . . . . . . . . . . . . . . . . . . सन्ति किल ।

पुनः कुतः अस्मिन् एतादृशं वात्सल्यम् ?

सुरभिः - भो वासव! दुर्बले पुत्रे मातुः. . . . . . . . . . . . . . . . सहजमेव ।

----------------------------------------------------------------------------------------------

# महाभारतस्य अष्टादशपर्वाणि

आदिसभाविपिनानिविराटप्रोद्यमभीष्मगुरूणि च कर्णः ।

शल्यकसौप्तिकपर्व तथा स्त्री शान्त्यनुशास्ति तुरङ्गमेधाः ।

आश्रममौसलयानिकनाकाः पर्वणि पर्वणि नामविशेषाः ।।

| | | | |
|---|---|---|---|
| १ | आदि- आदिपर्व। | १० | सौप्तिकपर्व - सौप्तिकपर्व। |
| २ | सभा- सभापर्व। | ११ | स्त्री - स्त्रीपर्व। |
| ३ | विपिनानि- आरण्यपर्व। | १२ | शान्ति - शान्तिपर्व। |
| ४ | विराट- विराटपर्व। | १३ | अनुशास्ति - अनुशासनपर्व। |
| ५ | प्रोद्यम- उद्योगपर्व। | १४ | तुरङ्गमेधाः ।- अश्वमेधपर्व। |
| ६ | भीष्म - भीष्मपर्व। | १५ | आश्रम- आश्रमपर्व। |
| ७ | गुरूणि - द्रोणपर्व। | १६ | मौसल- मौसलपर्व। |
| ८ | कर्णः- कर्णपर्व। | १७ | यानिक - महाप्रस्थानपर्व। |
| ९ | शल्यक- शल्यपर्व। | १८ | नाकाः- स्वर्गारोहणपर्व। |

----------------------------------------------------------------------------------------------

---

## पाठः ३

# मधुमान् नो वनस्पतिः ।

सस्यानि प्राणवायुदातारः भवन्ति । मानवाः भक्षणाय, वासाय, आरोग्याय च सस्यान् उपयुज्यन्ते ।

### श्रद्धेयाः अंशाः

► सर्वाणि सस्यानि औषधगुणयुक्तानि भवन्ति ।
► सस्यविज्ञानमधिकृत्य विरचितेषु ग्रन्थेषु सुरपालस्य वृक्षायुर्वेदः प्रसिद्धः भवति ।
► वृक्षायुर्वेदे तरुमहिमा, भूमिनिरूपणम्, बीजसंरक्षणविधिः, सस्यानां पोषणं रोगचिकित्सादयः विशदीक्रियन्ते ।
► सस्यानि वृक्ष- वनस्पति- वीरुत्- ओषधिः इति चतुर्धा विभक्तः ।

**<u>वाक्येनैकेन उत्तरं लीखत ।</u>**

1 . ' दशकूपसमा वापी ' - वाक्यमिदं कस्मिन् ग्रन्थे भवति ? वृक्षायुर्वेदे ।
2 . ' वृक्षायुर्वेदस्य' कर्ता कः ? सुरपालः ।
3. वृक्षायुर्वेदे कति अध्यायाः सन्ति ? त्रयोदश ।
4 सस्यानि मानवा इव सुखदुःखानि अनुभवन्ति इति कुत्र प्रस्तौति ? महाभारते शान्तिपर्वणि ।.
5. सस्यानि प्रमुखतया कति विधानि भवन्ति ? चतुर्विधानि ।
6. फलात्पूर्वं पुष्पाणि स्पष्टतया दृश्यते स................ इति कथ्यते । वृक्षः ।
7. अव्यक्तपुष्पः यः फलति स एव ................ वनस्पतिः ।
8. फलपाकान्ता ..................... भवति । ओषधिः ।
9. प्रतानैः प्रसारिता ................ भवति । वीरुत् ।
10. आम्रजम्ब्वादयः .................. भवति । वृक्षः ।
11. पनसोदुम्बरादयः................ भवति । वनस्पतिः ।
12. कूश्माण्डकर्कट्यादयः ................ भवति । वीरुत् ।
13. व्रीहिगोधूमादयः................ भवति । ओषधिः ।

**<u>सस्यप्रभेदान् अधिकृत्य टिप्पणीलेखनम्</u>**

मानवानां स्वजीवनपरिस्फूर्तये सस्यानां साहाय्यम् अत्यन्तापेक्षितं भवति ।भारतीयाः सस्यसंरक्षणे जागरूकाः अभवन् । भोजनाय , गृहनिर्माणाय, आरोग्यपरिपालनाय च

---

मानवाः सस्यानि आशिश्रिये। ऋग्वेदे ,शतपथब्राह्मणे , तैत्तिरीयसंहितायां च भारतीय सस्यविज्ञानस्य प्राग्रूपं दृश्यते । सस्यविज्ञानमधिकृत्य विरचितेषु ग्रन्थेषु सुरपालस्य वृक्षायुर्वेदः प्रसिद्धोऽस्ति। त्रयोदश अध्यायै: सम्पन्नेऽस्मिन् ग्रन्थे तरुमहिमा, भूमिनिरूपणं, बीजसंरक्षणविधिः, सस्यानां पोषणं, तेषां रोगचिकित्सादयश्च पृथक् पृथक् विशदी क्रियन्ते ।

सस्यानि सर्वाणि प्रमुखतया वृक्षः , वनस्पतिः , वीरुत् , ओषधिः इति भेदेन चतुर्धा विभक्तानि । यस्मिन् फलात्पूर्वं पुष्पाणि स्पष्टं दृश्यते स वृक्षः। आम्रजम्बूनालिकेरादयः वृक्षाः। अव्यक्तपुष्पः यः फलति स एव वनस्पतिः। पनसः उदुम्बरादयः वनस्पतिः । प्रतानैः प्रसारिता वीरुत्। कूश्माण्डकर्कट्यादयः वीरुधः। फलपाकान्ता ओषधिः। कदली व्रीहि गोधूमादयः ओषधिश्च । सस्यानां संरक्षणं सर्वथा सर्वदा करणीयम् । अत एव प्राचीनाः एवं प्रार्थितवन्तः। यथा

दशकूपसमा वापी दशवापीसमो हृदः ।
दशहृदसमः पुत्रो दशपुत्रसमो द्रुमः ।।

## सविशेषश्रद्धायै

| कृतिः | कर्ता | विभागः |
|---|---|---|
| महाभारतम् | व्यासः | इतिहासम् |
| वृक्षायुर्वेदः | सुरपालः | शास्त्रग्रन्थः |
| शङ्करदिग्विजयम् | माधवविद्यारण्यस्वामि | महाकाव्यम्/ जीवचरित्रकाव्यम् |
| सत्यशोधनम् | महात्मागान्धी | आत्मकथा |
| कनकधारास्तोत्रम् | शङ्कराचार्यः | स्तोत्रकाव्यम् |
| विवेकचूडामणिः | शङ्कराचार्यः | प्रकरणम् |

---

# शतृ- शानच् रूपाणि

| क्रियापदम् | शत्रन्तम् | शानजन्तम् | क्रियापदम् | शत्रन्तम् | शानजन्तम् |
|---|---|---|---|---|---|
| पचते | पचन् | पचमानः | कम्पते | कम्पन् | कम्पमानः |
| ताडयति | ताडयन् | ताड्यमानः | हसति | हसन् | हसमानः |
| गच्छति | गच्छन् | गम्यमानः | करोति | कुर्वन् | क्रियमाणः |
| प्रेरयति | प्रेरयन् | प्रेर्यमाणः | नुदति | नुदन् | नुद्यमानः |

# वृक्षविभागः

| वृक्षः | वनस्पतिः | वीरुत् | ओषधिः |
|---|---|---|---|
| आम्रः | पनसः | द्राक्षा | कदली |
| नालीकेरः | उदुम्बरः | कर्कटी | इक्षुः |
| पूगः | अश्वत्थः | कूश्माण्डः | गोधूमः |
| आरग्वधः | | गोस्तनी | यावनालः |
| शिग्रुः | | कारवेल्लः | व्रीहिः |

# अव्ययानि

| क्रियापदम् | क्त्वान्तम् | तुमुन्नन्तम् | ल्यबन्तम् |
|---|---|---|---|
| पठति | पठित्वा | पठितुं | प्रपठ्य |
| गच्छति | गत्वा | गन्तुं | आगत्य/<br>आगम्य |
| पश्यति | दृष्ट्वा | द्रष्टुम् | प्रदृश्य |
| स्नाति | स्नात्वा | स्नातुम् | प्रस्नाय |
| पिबति | पीत्वा | पातुं | निपीय |

---

---

एककम् २

पैतृकम्

**पाठः ४**

**<u>कनकधारा</u>**

भारतीयदर्शनेषु अद्वैतदर्शनस्य योगदानं महदस्ति। अस्य दर्शनस्य उपज्ञाता भवति जगद्गुरुः श्री शङ्कराचार्यः। अयं महात्मा केरलीयः भवति । श्रीशङ्कराचार्यस्य जीवन मधिकृत्य श्रीमाधवविद्यारण्यस्वामिना विरचितं महाकाव्यं भवति शङ्करदिग्विजयम्। शङ्कराचार्येण ब्रह्मचर्याश्रमे तेन साक्षात्कृतस्य कस्यापि परिवारस्य दारिद्र्यपरिहरणाय ऐश्वर्यदेवतां स्तुवन् विरचितं स्तोत्रकाव्यं पश्चात् कनकधारास्तोत्रम् इति नाम्ना विख्यातम्।

**श्रद्धेयाः अंशाः**

- बालः श्री शङ्करः गुरुकुलात् सतीर्थ्यैः सह प्रतिगृहं भिक्षार्थम् अटति
- सः कश्चन दरिद्रस्य ब्राह्मणस्य गृहं प्रविशति
- तत्रस्था ब्राह्मणपत्नी भिक्षादानाय किमपि नास्ति इत्यतः स्वस्य जन्म निरर्थकं जातमिति मत्वा दुःखिता अभवत्
- तथापि शुष्कमेकं आमलकं बालाय शङ्कराय ददाति
- तदामलकं स्वीकृत्य श्री शङ्करः तेषां दारिद्र्यनिवृत्यर्थं ऐश्वर्यदेवतां प्रार्थयति
- सन्तुष्टा लक्ष्मी कनकामलकैः तद् भवनं पूरयति ।

**<u>वाक्येनैकेन उत्तरं लिखत ।</u>**

| | |
|---|---|
| 1 बारतेषु अद्वैतचिन्ताप्रतिष्ठापकः कः ? | श्रीशङ्करः। |
| 2 श्रीशङ्करदिग्विजयं नाम महाकाव्यस्य कर्ता कः? | माधवविद्यारण्यस्वामिनः। |
| 3 भैक्ष्यलिप्सया श्रीशङ्करः कस्य भवनं विवेश ? | द्विजन्मनः। |
| 4 ब्राह्मणपत्नी शङ्कराय किम् अदात् ? | शुष्कम् आमलकम्। |
| 5 मुरभित्कुटुम्बिनी का ? | लक्ष्मी। |
| 6 निर्धनः केन वञ्चितः? | विधिना। |
| 7 विवेश- अत्र लकारः कः? | लिट् |

---

--------------------------------------------------------------------------------------------------------

**श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

**१. स हि जातु गुरोः कुले वसन्**
**सवयोभिः सह भैक्ष्यलिप्सया ।**
**भगवान् भवनं द्विजन्मनो**
**धनहीनस्य विवेश कस्यचित् ॥**

१. ' ऐश्वर्ययुक्तः' इत्यस्य समानार्थकं पदं किम् ?
२. ' ब्राह्मणः' इत्यर्थकं पदं श्लोकात् चित्वा लिखत ?
३. अस्मिन् श्लोके क्रियापदं किम् ?
४. शङ्करः कुत्र विवेश ?
५. शङ्करः कैः सह भिक्षार्थम् अटति ?

**२. तमवोचत तत्र सादरं**
**वटुवर्यं गृहिणः कुटुम्बिनी ।**
**कृतिनो हि भवादृशेषु ये**
**वरिवस्यां प्रतिपादयन्ति ते ॥**

१. का अवोचत ?
२. ' आदरेण सह' इत्यर्थे प्रयुक्तम् एकपदं किम् ?
३. ' गृहिणी' इत्यर्थकं पदं किम् ?
४. अस्मिन् श्लोके क्रियापदं किम् ?

**३. इति दीनमुदीरयन्त्यसौ**
**प्रददावामलकं व्रतीन्दवे ।**
**करुणं वचनं निशम्य सोऽ-**
**- प्यभवज्ज्ञाननिधिर्दयार्द्रधीः ।।**

१. कुटुम्बिनी व्रतीन्दवे किं प्रददौ ?
२. ज्ञाननिधिः सः कीदृशः अभवत् ?
३. ल्यबन्तं पदं चित्वा लिखत ।
४. श्लोकादेकं क्रियापदं चित्वा लिखत ।

--------------------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------------

**४. स मुनिर्मुरभित्कुटुम्बिनीं**

**पदचित्रैर्नवनीतकोमलैः ।**

**मधुरैरुपतस्थिवांस्तवै**

**द्विजदारिद्र्यदशानिवृत्तये ।।**

१. अस्मिन् श्लोके क्रियापदं किम् ?

२. किमर्थं शङ्करः ऐश्वर्यदेवताम् उपासितवान् ?

३. सः मुनिः कीदृशैः स्तवैः लक्ष्मीम् उपासितवान् ।

४. ऐश्वर्यदेवता इति अर्थकं पदं श्लोकात् चित्वा लिखत ।

५. **अमरस्पृहणीयसम्पदं**

**द्विजवर्यस्य निवेशमात्मवान् ।**

**स विधाय यथापुरं गुरोः**

**सविधे शास्त्रवराण्यशिक्षत ॥**

१. श्लोके क्रियापदं किम् ?

२. सः गुरोः सविधे किम् अशिक्षत ?

३. श्लोकात् ल्यबन्तपदं चित्वा लिखत ।

४. सः कस्य सविधे शास्त्रवराणि अशिक्षत ?

**<u>अधोदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत ।</u>**

१. स हि जातु गुरोः कुले वसन् सवयोभिः सह भैयलिप्सया ।

भगवान् भवनं द्विजन्मनो धनहीनस्य विवेश कस्यचित् ।।

गुरोः कुले .................... स भगवान् भैक्ष्यलिप्सया.................. सह जातु

कस्यचित् ..................द्विजन्मनः भवनं ..................हि ।

२. अमुना वचनेन तोषिता कमला तद्भवनं समन्ततः ।

कनकामलकैरपूरयज्जनतायाः हृदयं च विस्मयैः ।।

अमुना.......... तोषिता .......... तद्भवनं समन्ततः.................. अपूरयत् ।

विस्मयैः.................. हृदयं च अपूरयत् ।

---

**संभाषणांशान् पूरयत ।**

श्रीशङ्करः - भवति! भिक्षां देहि ।

ब्राह्मणपत्नी - ..................अतितेजस्वी बालः, कोऽयम् ?

वत्स! ..................आगतवान् ?

श्रीशङ्करः - मातः! शङ्करोऽहं समीपस्थात् गुरुकुलात् आगतवान् ।

ब्राह्मणपत्नी - पुत्र! किमर्थम् आगतोऽसि ?

श्रीशङ्करः - ..................आगतवान् ।

ब्राह्मणपत्नी - हा धिक् । वत्स! अतीव दरिद्रा अहम् । अत्र ....... दातुं किमपि नास्ति । ( अन्तः गच्छति, पुनः प्रत्यागत्य) वत्स! अत्र केवलमेकं ........................एव अस्ति ।

श्रीशङ्करः - शुष्कम् आमलकम् ? समीचीनम्, कृपया ददातु ।

ब्राह्मणपत्नी - ..................पुत्र ।

---

## श्रीशङ्कराचार्यस्य कृतयः भाष्यम् प्रकरणम् स्तोत्रम् इति क्रमेण

| भाष्यम् | प्रकरणम् | स्तोत्रम् |
|---|---|---|
| ब्रह्मसूत्रभाष्यम्<br>भगवद्गीताभाष्यम्<br>दशोपनिषदां भाष्यम्<br><u>*विशेषसूचना-*</u><br>*एतानि प्रस्थानत्रयमिति नाम्नापि प्रसिद्धानि ।* | आत्मबोधः<br>उपदेशसाहस्री<br>प्रबोधसुधाकरम्<br>मनीषापञ्चकम्<br>मातृपञ्चकम्<br>विवेकचूडामणिः<br>शतश्लोकी | कनकधारास्तवम्<br>सौन्दर्यलहरी<br>शिवानन्दलहरी |

---

---

## पाठः ५

## जयन्ति ते सुकृतिनः ।

कर्मनिरताः अनेके महात्मानः भगवद्गीतया प्रचोदिताः सन्ति। देशाभिमानोज्ज्वलित वीर्यचरितः ते अद्यापि जनमनसि विराजन्ते। बालगङ्गाधरतिलकः, महात्मगान्धी, डा. एस्. राधाकृष्णादयः तेषु अग्रगण्याःभवन्ति ।

### श्रद्धेयाः अंशाः

| **बालगङ्गाधरतिलकः** | **महात्मागान्धी** | **डा. एस्. राधाकृष्णः** |
|---|---|---|
| स्वतन्त्रतासंग्रामकाले स्व राज्यं मम जन्माधिकार इति जनानुद्घोषितवान्। सः भारतीय दर्शनं संस्कृ तिं च अधिकृत्य ग्रन्थानि रचित-वान्। सः देशीयोत्सव समा योजनैः स्वपत्रिकाभिः च जनान् आयोजयच्च। गीतारहस्यमिति भगवद्-गीता व्याख्यानमनेन विरचितम्। वेदानां काल निर्णयः अपि कृतः। | भारतस्य राष्ट्रपिता भवति महात्मागान्धी। भारतीय दर्शनैः प्रचो दितः सः अहिंसा सिद्धान्तं प्रचा रितवान्। सत्य शोधनं नामके आत्मकथा ग्रन्थे संस्कृतस्य भगवद्गी तायाः च महत्वं संसूच्य ' संस्कृतपठनात् ऋते एकः यथार्थ भारतीयो न भवेत् ' इति लिखि तवान् च । | भारतीयदर्शनैः आकृष्ट: डा. एस्. राधाकृष्णः भारतस्य प्रथमः उप राष्ट्रपतिः आसीत्। ओक्स् फर्ड् सर्वकला शालाया मध्यापकवृत्तिं कृतेषु भारती - येषु अयमेव प्रथमः भवति। वेदान्तस्य धार्मिकतेति नाम्ना वेदान्तस्य व्याख्यानम् अनेन विरचितम्। अस्य जन्मदिन मेव भारतेषु अध्यापकदिनत्वेन आचर्यते । |

### वाक्येनैकेन उत्तरं लीखत ।

1. " स्वराज्यम् अस्माकं जन्माधिकार एव" -
   कस्य वचनमिदम् ? बालगङ्गाधरतिलकस्य ।
2. सर्वदर्शनानां सारसंग्रहभूता भवति............ । भगवद्गीता ।
3. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
   इयमुक्तिः कस्मात् ग्रन्थात् स्वीकृता ? भगवद्गीतात:।
4. इदं प्रथमतया वेदानां कालनिर्णयार्थं कः प्रयत्नं कृतवान् ? बालगङ्गाधरतिलक:।
5. सत्यशोधनं नामक ग्रन्थस्य कर्ता कः ? महात्मागान्धी।

---

------------------------------------------------------------------------------------------------

6. भारतस्य प्रथम उपराष्ट्रपतिः कः ? डॉ एस् राधाकृष्ण: ।

7. ओक्स्फोर्ड सर्वकलाशालायां पाठनाय
इदं प्रथमतया गतः भारतीयः कः ? डॉ एस् राधाकृष्ण: ।

8. वेदान्तस्य धार्मिकता इत्यस्य ग्रन्थस्य कर्ता कः ? डॉ एस् राधाकृष्ण: ।

9. बालगङ्गाधरस्य नामान्तरं किम् लोकमान्यतिलकः

10. ऋते प्रयोगे विभक्ति: कः ? पञ्चमी ।

11. भवेत् इत्यत्र लकारः कः? विधिलिङ् ।

12. राष्ट्रस्य पिता राष्ट्रपिता । एवं चेत् राष्ट्रपतिः ........... ? राष्ट्रस्य पतिः ।

13. ................ ऋते कश्चन यथार्थ भारतीयो भवितुं नार्हति । संस्कृतपठनात् ।

14 वेदान्तस्य धार्मिकता इति ग्रन्थस्य कर्ता कः? डॉ एस् राधाकृष्ण:

**<u>सूचनानुसारं जीवनचरितं लिखत ।</u> (मातृका)**

| | | |
|---|---|---|
| नाम | - | स्वातितिरुनाळ् |
| जन्म | - | १८१३ एप्रिल् १३ |
| पितरौ | - | राजराजवर्मा वलियकोयित्तम्पुरान्, राणी गौरीलक्ष्मीबाई |
| भाषापाण्डित्यं | - | त्रयोदशवयसः पूर्वमेव संस्कृतं, मलयालं, हिन्दुस्थानी, तेलुगु, मराठी,आङ्गलेयादिषु भाषासु निष्णातः । |
| कलाभिरुचिः | - | सङ्गीतनृत्तकलादिषु बाल्य एव तात्पर्यम् । वाग्गेयकारः । |
| कृतयः | - | रागमालिका स्वरजति, नवरात्रकीर्तनानि, हिन्दुस्थानी भजनकीर्तनानि इत्यादीनी । |
| कर्ममण्डलम् | - | प्रजापालनम् संगीतम् । |
| प्रशस्ति: | - | गर्भश्रीमान् । सङ्गीतसम्राट् |
| कीर्तनमुद्रा | - | पद्मनाभः । |
| मृतिः | - | १८४६ डिसम्बर् २७ । |

**<u>स्वातितिरुनाल्</u>**

गर्भश्रीमान् इति प्रसिद्धः स्वातितिरुनाल् महाभागः त्रयोदशाधिकाष्टादशशततमे (१८१३) वर्षे एप्रिल मासस्य त्रयोदशे दिने जनिमलभत। तस्य पितरौ राणी गौरीलक्ष्मीबाई राजराजवर्मा चास्ताम्। बाल्य एव संगीतनृत्तकलादिषु तत्परोऽयं

------------------------------------------------------------------------------------------------

-----------------------------------------------------------------------------------------------

वाग्गेयकारः आसीत् । त्रयोदशवयसः पूर्व एव संस्कृतं, मलयालं, हिन्दुस्थानी, तेलुगु, मराठी, आङ्गलेयादिषु निष्णातः आसीत् । अष्टादशतमे वयसि राजपदवीम् आरूढेन अनेन बहूनि कीर्तनानि रचितानि। अयं महानुभावः रागमालिकास्वरजतिः, नवरात्र कीर्तनानि, हिन्दुस्थानी भजनकीर्तनानि इत्याद्यनेकैः श्रुतितालरागयुक्तैः कीर्तनैः सङ्गीतोपासनां कृतवान्। तथा कर्णाटकसङ्गीते वयलिन् इति तन्त्रिवाद्यस्य परिचायनमपि अनेन कृतम्।अस्य महानुभावस्य कीर्तनमुद्रा पद्मनाभ इत्यासीत् ।सङ्गीतसम्राट् इत्यपि प्रथितः महाराजः स्वातितिरुनाल १८८७ तमे वर्षे उपरतः।

**<u>सूचनानुसारं जीवनचरितं लिखत।</u>**

१. नाम - श्री नारायण गुरुदेवः

जननं - तिरुवनन्तपुरे चेम्पषन्ती ग्रामे।

पितरौ - माटनाशान्, कुट्टियम्मा।

प्रवर्तनमण्डलं - सामूहिक परिष्कर्ता, संन्यासिवर्यः समाजोद्धारकः ।

कृतयः - दर्शनमाला, आत्मोपदेशशतकं, दैवदशकम् ।

देहवियोगः - 1928 सप्तम्बर् मासे एकाविंशतितमे दिनाङ्के ।

२. नाम - मौलाना अब्दुल्कलाम् आसादः ।

जन्म - सौदि अरेब्यायां मेक्का देशे 1888 नवम्बर् ।।

कर्ममण्डलं - भारतस्य प्रथमशिक्षामन्त्री, ग्रन्थकारः, स्वतन्त्रतासंग्रामनायकः ।

पुरस्कार : - ' भारतरत्न' पुरस्कारः ( 1992 तमे वर्षे मरणानन्तर बहुमतिः)

सविशेषता - देशीयशिक्षादिनत्वेन जन्मदिनम् आचरति ।

देहवियोगः - 1958 फेब्रुवरी मासे 22 दिनाङ्के ।

३. नाम - डो सर्वेप्पल्ली राधाकृष्णः ।

जन्म - 1888 सेप्तम्बर् 5, तिरूत्तणि, तमिलनाडु ।

पितरौ - एस् वीरस्वामी, सीतम्मा ।

प्रशस्तिः - भारतस्य राष्ट्रपतिः, दार्शनिकः ।

मृत्युः - 1975 एप्रिल् 17 ।

-----------------------------------------------------------------------------------------------

---

## पाठः ६

# रागसुधारस

भारतीयासु चतुष्षष्टिकलासु अन्यतमा भवति संगीतम् । गान्धर्वविद्या इत्यपरनाम्ना प्रसिद्धस्य संगीतस्य उपासका: महात्मानः अनेके सन्ति । त्यागराजः, मुत्तुस्वामी दीक्षितर, स्वातितिरुनाल् प्रभृतयः तस्योपासनया कीर्तिमाप्ताः भवन्ति ।

**श्रद्धेयाः अंशाः**

- ► तञ्चावूर्देशीयः निर्धनः त्यागराज उञ्च्छवृत्या एव जीवनं नीतवान् ।
- ► संगीतोपासनया सः जनहृदयम् आह्लादयन् कीर्तिमार्जितवान् ।
- ► निर्धनत्वे अपि सः राजस्तुतिपरकीर्तनानां रचनासु विमुखःआसीत् ।
- ► मानवसेवापेक्षया माधवसेवायाः ( ईश्वरसेवा) प्रामुख्यं दत्तवानासीत् ।
- ► आत्मानं द्रष्टुम् आगतं केरलीयसंगीतज्ञं षट्कालगोविन्दमारार् महाभागं श्रीरागविशिष्टेन कीर्तनेन त्यागराजः आर्चयत्
- ► तत् कीर्तनं "एन्तरो महानुभावुलु. " . ,पञ्चरत्नकीर्तनमिति विख्यातेषु पञ्चकीर्तनेष्वु अन्यतमं भवति ।

**<u>वाक्येनैकेन उत्तरं लीखत ।</u>**

1. चतु:षष्टिकलासु .................. प्रथमस्थानं परिकल्पयति । संगीतस्य ।
२. त्यागराज: .................. विशिष्टेन कीर्तनेन तमभ्यर्चयत् ? श्रीरागः ।
3. सङ्गीतविद्यायाः नामान्तरं .................. । गान्धर्वविद्या ।
4 सः त्यागराजस्य मैत्रीमैच्छत् । स: क:? शरभोजी ।
5. श्रूयते अनेन इति.................. । श्रुतिः ।
6. वाचं गेयं च कुरुते य: सः ..................... । वाग्गेयकार: ।
7. "धनार्जनम् उत ईश्वरभजनं वा करणीयम् " कस्य वचनमिदम् ? त्यागराजस्य ।
8. ' एन्दरो महानुभावुलु ' अत्र कः रागः? श्रीरागः ।

**<u>पदच्छेदं लिखत ।</u>**

१. का + इयं → केयम् । एवं चेत् सा + इयम् = .................................. ।
२. तेन + एव - तेनैव । एवं चेत् अनेन + एव = .................................. ।

---

---

**स्मरणीयाः अंशाः**

**पदच्छेदाः**

| अ / आ + इ = ए |
|---|

| | | | | |
|---|---|---|---|---|
| एव | + | इति | = | एवेति । |
| का | + | इयम् | = | केयम् । |
| च | + | इति | = | चेति । |

| आ + अ = आ |
|---|

| | | | | |
|---|---|---|---|---|
| तथा | + | अपि | = | तथाऽपि । |

| इ + ए = ये |
|---|

| | | | | |
|---|---|---|---|---|
| झटिति | + | एव | = | झटित्येव । |
| अपि | + | एनम् | = | अप्येनम् । |

| अ / आ + ए , ऐ = ऐ |
|---|

| | | | | |
|---|---|---|---|---|
| तेन | + | एव | = | तेनैव । |
| न | + | एव | = | नैव । |
| एव | + | अहं | = | एवाहम् । |
| सहजा | + | एव | = | सहजैव । |

| अ + अ ,आ = आ |
|---|

| | | | | |
|---|---|---|---|---|
| च | + | आसीत् | = | चासीत् । |

| औ + अ ,आ = आव, आवा |
|---|

| | | | | |
|---|---|---|---|---|
| भूगतौ | + | अश्विनीसुतौ | = | भूगतावश्विनीसुतौ । |
| तौ | + | अनादृत्य | = | तावनादृत्य । |
| प्रददौ | + | आमलकम् | = | प्रददावामलकम् । |

| अः + अ = ओ |
|---|

| | | | | |
|---|---|---|---|---|
| प्रसिद्धः | + | अस्ति | = | प्रसिद्धोऽस्ति । |
| सः | + | अपि | = | सोऽपि । |
| कृशगात्रः | + | अपि | = | कृशगात्रोऽपि । |

---

---

| |
|---|
| अः/ आः + च = अश्च/ आश्च |
| अः + द = ओ द |
| अः + ध = ओ ध |
| अः + म = ओ म |
| अः + व = ओ व |

| | | | | |
|---|---|---|---|---|
| असमर्थः | + | च | = | असमर्थश्च । |
| प्रभेदाः | + | च | = | प्रभेदाश्च । |
| अन्येभ्यः | + | दुर्बलः | = | अन्येभ्यो दुर्बलः । |
| द्विजन्मनः | + | धनहीनस्य | = | द्विजन्मनो धनहीनस्य । |
| परिश्रमः | + | मिताहारः | = | परिश्रमो मिताहारः । |
| नः | + | वनस्पतिः | = | नो वनस्पतिः । |

| |
|---|
| इः/ ऐः + वि = इर्वि/ ऐर्व |

| | | | | |
|---|---|---|---|---|
| शनैः | + | विद्या | = | शनैर्विद्या । |

| |
|---|
| इः + अ = ऐर |

| | | | | |
|---|---|---|---|---|
| शनैः | + | अर्थः | = | शनैरर्थः । |
| आमलकैः | + | अपूरयत् | = | आमलकैरपूरयत् । |

| |
|---|
| इः + इ = इरि |

| | | | | |
|---|---|---|---|---|
| उक्तिः | + | इयम् | = | उक्तिरियम् । |
| पंक्तिः | + | इयम् | = | पंक्तिरियम् । |

| |
|---|
| इः + उ = इरु |

| | | | | |
|---|---|---|---|---|
| तुष्टिः | + | उत्तमा | = | तुष्टिरुत्तमा । |

| |
|---|
| इः + च = श्च |

| | | | | |
|---|---|---|---|---|
| मेघारवैः | + | च | = | मेघारवैश्च । |
| ओषधिः | + | च | = | ओषधिश्च । |

| |
|---|
| उः + अ = उर |

| | | | | |
|---|---|---|---|---|
| हेतुः | + | अभूत् | = | हेतुरभूत् । |

---

---

| ओः + ए = ओरे |
|---|

| | | | | |
|---|---|---|---|---|
| तयोः | + | एकः | = | तयोरेकः । |

| त् + च = च्च |
|---|

| | | | | |
|---|---|---|---|---|
| न्यवेदयत् | + | च | = | न्यवेदयच्च । |

| न् + अ / आ = न्न / न्ना<br>न् + ए = न्ने |
|---|

| | | | | |
|---|---|---|---|---|
| कुर्वन् | + | आसीत् | = | कुर्वन्नासीत् । |
| तस्मिन् | + | एव | = | तस्मिन्नेव । |

**व्याकरणविशेषाः**

१. धिक् ।

धिक् शब्दयोगे द्वितीया ।

यथा - धिक् इदं जन्म **निरर्थकं** गतम् ।

धिक् ताम् अवस्थाम् ।

२. सह, साकं , समं , सार्धं प्रयोगे तृतीया ।

यथा - **रामेण सह** सीता वनं गच्छति ।

३. ऋते , बहि शब्दयोः प्रयोगे पञ्चमि ।

यथा - संस्कृत पठनात् **ऋते** यथार्थ भारतीयो न भवति ।

बालकाः गृहाद्बहिः क्रीडन्ति ।

**विग्रहवाक्यानि**

| | | |
|---|---|---|
| १. देही | - | देहम् अस्य अस्ति इति देही । |
| २. सुराधिपः | - | सुराणाम् अधिपः सुराधिपः । |
| ३. वैद्यान्तरम् | - | अन्यं वैद्यं वैद्यान्तरम् । |
| ४. गुरुमहिमा | - | गुरोः महिमा गुरुमहिमा । |
| ५. राष्ट्रपतिः | - | राष्ट्रस्य पतिः राष्ट्रपतिः । |
| ६. समक्षम् | - | अक्ष्णोः समीपं समक्षम् । |

---

**काव्यमुक्तावलिः**

| काव्यम् | कवि | स्त्रीकथापात्राणि | आहत्य सर्गाः |
|---|---|---|---|
| कुमारसंभवम् | कालिदासः | पार्वती | १९ |
| रघुवंशम् | कालिदासः | सीता | १८ |
| किरातार्जुनीयम् | भारविः | पाञ्चालि | १८ |
| नैषधीयचरितम् | श्रीहर्षः | दमयन्ति | २१ |
| शिशुपालवधम् | माघः | भटपत्नी | २० |

**वेदवेदाङ्गोपनिषदां च पट्टिका**

<table>
<tr><th>वेदाः</th><th>वेदाङ्गानि</th><th>दशोपनिषदः</th><th>आधारः वेदः</th></tr>
<tr><td>ऋग्वेदः</td><td>शिक्षा</td><td>ऐतरेयोपनिषद्</td><td>ऋग्वेदः</td></tr>
<tr><td>यजुर्वेदः</td><td>कल्पम्</td><td rowspan="4">ईशावास्योपनिषद् /<br>कठोपनिषद्<br>तैत्तिरीयोपनिषद् /<br>बृहदारण्यकोपनिषत्</td><td rowspan="4">यजुर्वेदः</td></tr>
<tr><td>सामवेदः</td><td>व्याकरणम्</td></tr>
<tr><td>अथर्ववेदः</td><td>निरुक्तम्</td></tr>
<tr><td></td><td>ज्योतिषम्</td></tr>
<tr><td></td><td>छन्दः</td><td>छन्दोग्योपनिषद् / केनोपनिषद्</td><td>सामवेदः</td></tr>
<tr><td></td><td></td><td>प्रश्नोपनिषद् /<br>मुण्डकोपनिषद्<br>माण्डूक्योपनिषद्</td><td>अथर्ववेदः</td></tr>
</table>

----------------------------------------------------------------------------------------------------

**कलिदासकृतयः**

| **महाकाव्यम्** | **नाटकम्** | **खण्डकाव्यम्** |
|---|---|---|
| रघुवंशम् | अभिज्ञानशाकुन्तलम् | मेघदूतम् |
| कुमारसंभवम् | विक्रमोर्वशीयम् | ऋतुसंहारम् |
| | मालविकाग्निमित्रम् | |

----------------------------------------------------------------------------------------------------

------------------------------------------------------------------------------------------------

[ MODEL QUESTION PAPER]

SSLC EXAMINATION, MARCH 2022

**SANSKRIT**

First language [Academic& Oriental] Paper I

Time.1.30 hrs **Total Score**. 40

------------------------------------------------------------------------------------------------

निर्देशाः

आदौ विंशति निमेषाः समाश्वाससमयः।

प्रश्नान् पठितुम् उत्तराणि क्रमीकर्तुं च समयोऽयम् उपयोक्तव्यः।

प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि।

प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः।उत्तरलेखनाय अङ्काः समयश्च परिगणनीयाः।

------------------------------------------------------------------------------------------------

**Part-I**

**A 1-6 यथेच्छं चतुर्णां प्रश्नानाम् उत्तरं कोष्ठकात् चित्वा लिखत ।** (4X1=4)

1. आरोग्यं केषु श्रेष्ठं भवति ?

( कृतकृत्येषु, लाभेषु , सुखेषु , धनेषु )

2. '*दीनवत्सला जननी* ' इति कथायां प्रतिपादितः विषयः कः ?

(दीनानुकम्पा , परोपकारः , मातृस्नेहः )

3.'एति' इति पदस्य लकारः कः ?

( लोट् ,लङ् ,लट् )

4.'गान्धर्वविद्या' इति नामान्तरेण प्रसिद्धं शास्त्रं किम् ?

(नाट्यम्, सङ्गीतम् , ज्योतिषम् )

5. क्रिस्तुभागवतस्य कर्ता कः ?

( पि सि देवस्य , फा.जोण् कुन्नप्पल्लि, अक्कित्तम् )

6.अधोदत्तेषु फलपाकान्तः सस्यविशेषः कः?

( कदली , पनसः , आम्रः)

**B 7-9 अधोलिखितानां त्रयाणां प्रश्नानाम् उत्तरं लिखत ।** (3X1= 3)

7. **संबोधन पदं चित्वा लिखत ?**

हे शिष्य ! भवान् गत्वा भिक्षां स्वीकुरु ।

8. उदाहरणानुसारं पदच्छेदं लिखत ?

यथाः- सहैव = सह + एव

ममैव =..........+............

9. अन्यं वैद्यं वैद्यान्तरं एवं चेत् **अन्यत् राज्यं**.........................

------------------------------------------------------------------------------------------------

---

## Part II

**A. 10 अधोलिखितस्य प्रश्नस्य उत्तरं लिखत ।** (1X2 = 2)

10. 'सुखदुःखयोः कर्ता आत्मानमेव ' इत्यर्थप्रतिपादकं श्लोकं चित्वा लिखत।

१. आत्मानमेव मन्येत कर्तारं सुखदुःखयोः ।
तस्माच्छ्रेयस्करं मार्गं प्रतिपद्येत न त्रसेत् ।।

२. ईर्ष्याभयक्रोधसमन्वितेन, लुब्धेन रुग्दैन्यनिपीडितेन ।
विद्वेषयुक्तेन च सेव्यमानम् ,अन्नं न सम्यक् परिपाकमेति ।।

B. 11-12 **प्रश्नद्वयेषु कस्यापि एकस्य प्रश्नस्य उत्तरं लिखत।** (1X2 = 2)

11. उदाहरणानुसारं वाक्यं परिवर्तयत।

**उदा** - वर्षाकालः आगतः । चण्डवातः आसीत् ।
यदा वर्षाकालः आगतः तदा चण्डवातः आसीत् ।

१. कमलं विकसति । भ्रमराः आगच्छन्ति ।

12. श्लोकं पठित्वा सूचनानुसारं गद्यक्रमं लिखत ।

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वति ।।

.............................एवं वादिनि..............पार्श्वे .......................अधोमुखी ।........................ गणयामास ।

## Part-III

**A. 13-16 यथेच्छं त्रयाणाम् उत्तरं लिखत ।** (3X3=9)

13. उदाहरणानुसारं पट्टिकां रचयत ।

| कर्ता | कृतिः | स्त्रीकथापात्रम् |
|---|---|---|
| कालिदासः | कुमारसंभवम् | पार्वती |
| माघः | ......................... | भटपत्नी |
| ........................ | किरातार्जुनीयम् | द्रौपदी |
| श्रीहर्षः | नैषधीयचरितम् | ................................... |

---

14. अधोदत्तवाक्यात् क्त्वान्त-ल्यबन्त तुमुन्नन्तानि चित्वा लिखत।

स्वपुरमागतं नचिकेतसं सत्कर्तुम् असमर्थः यमः

तमुपगम्य वरत्रयं दत्वा तेन सह संवादमकरोत् ।

15. उदाहरणानुसारं कोष्ठकात् क्रियापदानि स्वीकृत्य पट्टिकां पूरयत ।

(पिबति ,अलिखत् ,नयतु ,करोति ,अवसत् ,गच्छतु)

| **लट्** | **लङ्** | **लोट्** |
|---|---|---|
| करोति | अवसत् | नयतु |
| | | |

16. पेटिकातः समानार्थकपदानि स्वीकृत्य पूरयत ।

1. अतिवृष्टिः ..................
2. मार्गः ....................
3. कष्टेन .....................

| |
|---|
| कृच्छ्रेण |
| प्रवर्षः |
| पन्था |

**B. 17 अधोलिखितस्य प्रश्नस्य उत्तरं लिखत ।** (1X 3 = 3)

17. अधोदत्तानां सस्यानाम् औषधगुणाः लिखत।

1. हरिद्रा ....................
2. तुलसी ....................
3. निम्बः ....................

## Part IV

**A.18-20 द्वयोः प्रश्नयोः उत्तरं लिखत ।** (2X4= 8)

18. **सूचनानुसारं वृक्षप्रभेदमधिकृत्य लघूपन्यासं लिखत ।**

सूचना: → दशपुत्रसमः-वनस्पतिः- ओषधिः-चतुर्धा-अव्यक्तपुष्पः-पनसः-व्रीहिः

19. **गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

संस्कृतवाङ्मये अष्टोत्तरशताधिकाः उपनिषदः सन्ति। तासु दशोपनिषदः प्रमुखाः।एतासु उपनिषत्सु अतीव सुन्दरमस्ति कठोपनिषद् इति स्वामि विवेकानन्दस्य अभिप्रायः।यम-नचिकेतसोः संवादरूपेण भवति अस्याः

रचना। वैशम्पायनमहर्षेः शिष्येण कठेन विरचित त्वाद् कठोपनिषद् इति नाम सिद्धम्। अस्याम् उपनिषदि आत्मविद्यायाः श्रेष्ठता प्रतिपा द्यते। स्वामि विवेकानन्दस्य उद्बोधनेषु दृश्यमाना "उत्तिष्ठत! जाग्रत! प्राप्यवरान्निबोधत" इति सुप्रसिद्धा सूक्तिः कठोपनिषदः उद्धृता भवति।

1. कति उपनिषदः सन्ति ?
2. कथम् अस्याः कठोपनिषद् इति नाम सिद्धम् ।
3. कठोपनिषदि प्रतिपादितः विषयः कः ?
4. कठोपनिषदः स्वामि विवेकानन्देन उद्धृता सूक्तिः का ?

20 सूचनानुसारं जीवनचरितं लिखत।

नाम - मौलाना अब्दुल्कलाम् आसादः ।

जन्म- सौदि अरेब्यायां मेक्का देशे 1888 नवम्बर् ।।

कर्ममण्डलं- भारतस्य प्रथमशिक्षामन्त्री, ग्रन्थकारः, स्वतन्त्रतासंग्रामप्रवर्तकः।

पुरस्कार- 'भारतरत्न' पुरस्कारः (1992 तमे वर्षे मरणानन्तर बहुमतिः)

सविशेषता- अस्य जन्मदिनम् देशीयशिक्षादिनत्वेन आचरति ।

देहवियोगः- 1958 फेब्रुवरी मासे 22 दिनाङ्के।

B. 21-22 **प्रश्नद्वयेषु कस्यापि एकस्य प्रश्नस्य उत्तरं लिखत।** (1X4 = 4)

21. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

इमामहं वेद न तावकीं धियं विचित्ररूपा खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः।

(क) श्लोकमिदं कस्मिन् काव्ये अन्तर्भवति ?

(ख) अस्य श्लोकस्य वक्ता का ?

(ग) श्लोकात् क्रियापदं चित्वा लिखत ।

(घ) के चेतः रुजन्ति ?

22. अधोदत्तां खण्डिकां पठित्वा सम्भाषणांशान् पूरयत ।

एकदा गुरुकुले वसन् श्रीशङ्करः भिक्षार्थं सतीर्थ्यैः सह एकं ब्राह्मणगृहं प्राप्तवान्। अम्ब! भिक्षां देहि इति शब्दं श्रुत्वा बहिरागता ब्राह्मणपत्नी दीनवचसा 'भिक्षां दातुं किमपि नास्ति, केवलम् शुष्कमेकम्

---

आमलकमेवास्ति इति अवदत् । भवति! यत्किमपि दीयताम् ' इति तस्य वचनम् अनुसृत्य कुटुम्बिनी शुष्कम् तद् आमलकम् आनयत् । बाल! इदं स्वीकरोतु' इत्युक्त्वा तत् शङ्कराय अदात् च ।

शङ्करः - अम्ब !..............................

कुटुम्बिनी - अत्र भिक्षां दातुं किमपि नास्ति, केवलम् शुष्कमेकम् आमलकमेवास्ति ।

शङ्करः - भवति! .......................दीयताम् ।

कुटुम्बिनी - ........................स्वीकरोतु ।

शङ्करः - ....................... ।

## Part V

23-24 **प्रश्नद्वयेषु कस्यापि एकस्य प्रश्नस्य उत्तरं लिखत।** (1X5 =5)

23. प्रादेशिकभाषया लिखत।

पौराणिक भारतीयाः प्रकृतिसंरक्षणे श्रद्धालवः आसन्। सस्यानां वैविध्यं तेषाम् औषधगुणांश्चाधिकृत्य ते बहून् ग्रन्थान् रचितवन्तः।विविधानां सस्यानां परि पालनविधयः ते सम्यक् ज्ञातवन्तः।प्रकृतिसंरक्षणाय प्रथमं वृक्षसंरक्षणम् अनिवार्यं भवति।'दशपुत्रसमो द्रुमः' इत्युक्तिः प्रसिद्धा खलु।

24 कविकुलगुरोः कालिदासस्य कुमारसम्भवम् रघुवंशम्, माघस्य शिशुपाल वधम् भारवेः किरातार्जुनीयम् श्रीहर्षस्य नैषधीयचरितम् इत्येतानि भवन्ति पञ्च महाकाव्यानि।एषु महाकाव्येषु सौन्दर्यस्य तथा शक्तेः प्रतिरूपेणैव महिलाः वर्णिताः।पार्वतीपरमेश्वरयोः विवाहपर्यन्ता कथा एव कालिदासकृत कुमारसम्भवस्यप्रतिपाद्यः। सूर्यवंशजातात् दिलीपादेव रघुवंशकथा प्रारभ्यते। पञ्चमहाकाव्येषु बारवेः किरातार्जुनीयम् अर्थगौरवेण सविषेषं स्थानमावहति।

----------------------

---